श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीपरमार्थस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीपरमार्थस्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्गृध्रसरस्तीरपारिजातमुपास्महे।
यत्र तुङ्गैरतुङ्गैश्च प्रणतैर्गृह्यते फलम्॥ १ ॥

गुरुभिस्त्वदनन्यसर्वभावैः
गुणसिन्धौ कृतसम्प्लवस्त्वदीये।
रणपुङ्गव वन्दिभावमिच्छन्
अहमस्म्येकमनुग्रहास्पदं ते॥ २ ॥

भुवनाश्रयभूषणास्त्रवर्गं
मनसि त्वन्मयतां ममातनोतु।
वपुराहवपुङ्गव त्वदीयं
महिषीणामनिमेषदर्शनीयम्॥ ३ ॥

अभिरक्षितुमग्रतः स्थितं त्वां
प्रणवे पार्थ रथे च भावयन्तः।
अहितप्रशमैरयत्नलभ्यैः
कथयन्त्याहवपुङ्गवं गुणज्ञाः॥ ४ ॥

कमला निरपायधर्मपत्नी
करुणाद्याः स्वयमृत्विजो गुणास्ते।
अवनं श्रयतामहीनमाद्यं
स च धर्मस्त्वदनन्यसेवनीयः॥ ५ ॥

कृपणाः सुधियः कृपासहायं
शरणं त्वां रण पुङ्गव प्रपन्नाः।

www.prapatti.com

अपवर्गनयादनन्यभावाः
वरिवस्यारसमेकमाद्रियन्ते॥ ६ ॥

अवधीर्य चतुर्विधं पुमर्थं
भवदर्थे विनियुक्तजीवितः सन्।
लभते भवतः फलानि जन्तुः
निखिलान्यत्र निदर्शनं जटायुः॥ ७ ॥

शरणागतरक्षणव्रती मां
न विहातुं रणपुङ्गवार्हसि त्वम्।
विदितं भुवने विभीषणो वा
यदि वा रावण इत्युदीरितं ते॥ ८ ॥

भुजगेन्द्रगरुत्मदादिलभ्यैः
त्वदनुज्ञानुभवप्रवाहभेदैः।
स्वपदे रणपुङ्गव स्वयं मे
परिचर्याविभवैः परिष्क्रियेथाः॥ ९ ॥

विमलाशयवेङ्कटेशजन्मा
रमणीया रणपुङ्गवप्रसादात्।
अनसूयुभिरादरेण भाव्या
परमार्थस्तुतिरन्वहं प्रपन्नैः॥ १० ॥

॥ इति श्रीपरमार्थस्तुतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com